M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. 1267

Title: Bhismastavaraja Stotra

Incomplete

1262

Bhiṣma Stava Rāja Stotra

Bhiṣma Stava Rāja Stotra			Title
			Author
			Editor
			Year, Vols.
			Publisher
1262			Remarks

॥श्रीभक्तवराजस्तोत्रप्रारंभः॥

श्रीगणेशायनमः॥जन्मेजयउवाच॥शरतल्पेश
यानस्तु भारतानांपितामहः॥कथमुत्सृष्टवान्दे
हंकंचयोगमधारयत्॥१॥वैशंपायनउवाच॥शृणु
ष्वावहितोराजन्शुचिर्भूत्वासमाहितः॥भीष्मस्य
नृपशार्दूलदेहोत्सर्गंमहात्मनः॥२ निवृत्तमात्रे
त्वयनेउत्तरेवैदिवाकरे॥समावेशयदात्मानमा
त्मन्येवसमाहितः॥३॥विकीर्णांशुरिवादित्यो

या
२ भीष्मःशतैश्चितः॥शिशयेपरमैलक्ष्म्यावृतोब्राह्म
णसत्तमैः॥४॥व्यासेनवेदविदुषानारदेनसुरर्षि
स्थाने णा॥देवस्थानेनवात्स्येनतथाश्मेनसुमंतुना॥५॥ त्स्ये श्मे
तथाजैमिनिनाचैवपैलेनचमहात्मना॥शांडिल्य
देवलाभ्यांचमैत्रेयेणचधीमता॥६॥असितेनवशि
ष्ठेनकौशिकेनमहात्मना॥हारितलोमशाभ्यांच
तथात्रेयेणधीमता॥७॥बृहस्पतिश्चकण्वश्च

च्यवनश्च महामुनिः॥ सनत्कुमारः कपिलो वाल्मी
किस्तुंबरुस्तथा॥ मौदगल्यो भार्गवो रामस्तृणं
बिंदुर्महामुनिः॥ पिप्पलादश्च वायुश्च संवर्त्तः पु
३य लहः क्रतुः॥९॥ काश्यपः पुलस्त्यश्च क्रतुर्दक्षः परा
शरः॥ मरीचिरंगिराः काश्यो गौतमो गालवो मुनिः॥
॥१०॥ धौम्यो विभांडो मांडव्यो धौम्यः कृष्णानुभौति
कः॥ उलूकः परमो विप्रो मार्कंडेयो महामुनिः॥११॥ २

भास्करिः पूरणः कृष्णः सूतः परमधार्मिकः॥ एतैश्चा
न्यैर्मुनिगणैर्महाभागैर्महात्मभिः॥१२॥ श्रद्धादम
पुरस्कारैर्वृतश्चंद्र इवग्रहैः॥ भीष्मस्तु पुरुषव्याघ्र
कर्मणा मनसा गिरा॥१३॥ भारतस्यागतः कृष्णं प्रद
ध्यौ प्रांजलिस्थितः॥ स्वरेण हृष्टपुष्टेन तुष्टाव म
धुसूदनं॥१४॥ योगेश्वरं पद्मनाभं कृष्णं विष्णुं जग
त्पतिं॥ कृतांजलिः शुचिर्भूत्वा वाग्विदां प्रवरः प्र

तु भुं ॥१५॥ भीष्मः परधर्मात्मा वासुदेवमथास्तुवत
भीष्म उवाच ॥ आरिराधयिषुः कृष्णं वाचं जिगदिषामि
यातु ॥१६॥ नयावास्समासिन्याप्रीयतां पुरुषोत्त
मः ॥ अनाद्यंतं परं ब्रह्म न देवा नर्षयो विदुः ॥ ए
कोयं वेद भगवान् धाता नारायणो विदुः ॥१८॥ नारा
यणादृषिगणास्तथा सिद्ध महोरगाः ॥ देवा देवर्षय
श्चैवयं विदुः परमव्ययं ॥१९॥ देवदानवगंधर्वायक्ष ३

राक्षसपन्नगाः ॥ यं न जानंति कोह्येष कुतो वा भग
वानिति ॥२०॥ यस्मिन् विश्वानि भूतानि तिष्ठंति
च विशंति च ॥ गुणभूतानि भूतेशे सूत्रे मणिग
णा इव ॥२१॥ यस्मिन्नित्ये तते तंतौ दृढे स्रगिव ति
ष्ठति ॥ सदसद्ग्रथितं विश्वं विश्वांगे विश्वकर्मणि
॥२२॥ हरिं सहस्रशिरसं सहस्रचरणेक्षणं ॥ स
हस्रबाहुमुकुटं सहस्रवदनोज्ज्वलं ॥२३॥ प्राहु

नारायणंदेवंयंविश्वस्यपरायणं॥ अणीयसामणी
यांसंस्थविष्टंचस्थवीयसां॥२४गरीयसांगरीष्टंच
श्रेष्टंचश्रेयसामपि॥ यंवाकेष्वनुवाकेषुनिषत्सू क्ये
पनिषत्सुच॥२५ चतुर्भिश्चतुरात्मानंसत्वस्थंसा
त्वतांपतिं॥ यंदिव्यैर्देवमर्च्यंतिगुह्यैःपरमना
मभिः॥२६ यस्मिन्नित्यंतपस्तप्तंयदंगेष्वनुति ४
ष्ठति॥ सर्वात्मासर्ववित्सर्वःसर्वज्ञःसर्वभाव

नः॥२७॥ यंदेवंदेवकीदेवीवसुदेवादजीजनत॥
भौमस्यब्रह्मणोगुप्त्यैदीप्तमग्निरिवारणिः॥२८॥
यमनन्योव्यपेताशीरात्मानंवीतकल्मषं॥ दृष्ट्वा
नंत्यायगोविंदंपश्यंत्यात्मन्यवस्थितं॥२९पु
राणेपुरुषंप्रोक्तंब्रह्मप्रोक्तंयुगादिषु॥ क्षयेसं
कर्षणंप्रोक्तंतमुपास्यमुपास्महे॥३०॥ यमेकं
बहुधात्मानंप्रादुर्भूतमधोक्षजं॥ नान्यभ

क्ताः क्रियावंतो यजंते सर्वकामदं ॥३१॥ यस्मात्कृ
र्जगतः कोशं यस्मिन् संन्निहिताः प्रजाः ॥ यस्मि
न्लोकाः स्फुरंतीमे जाले शकुनयो यथा ॥३२॥
ऋतमेकाक्षरं ब्रह्म यत्तत्सदसतः परं ॥ अना
न दिमध्यपर्यंतं देवा नऋषयो विदुः ॥३३॥ यं देवा
स्मरगंधर्वा ससिद्धर्षिमहोरगाः ॥ प्रयतानि
त्यमर्चंति परमं दुःखभेषजं ॥३४॥ अनादिनि ५

धनं देवमात्मयोनिं सनातनं ॥ अप्रतर्क्यम
विज्ञेयं हरिं नारायणं प्रभुं ॥३५॥ अनिवाय्विंदुक
र्माणं मतिसूर्याग्नितेजसं ॥ अतिबुद्धींद्रियात्मा
नं तं प्रपद्ये प्रजापतिं ३६॥ यं वै विश्वस्य कर्तारं
जगतस्तस्थुषां पतिं ॥ वदंति जगतोध्यक्षमक्ष
रं परमं पदं ॥३७॥ हिरण्यगर्भं यं गर्भमिदितिर्दैत्य
नाशनं ॥ एवं द्वादशधा जज्ञे तस्मै सूर्यात्मने नमः ॥३८
शा

शुक्लैर्दैवान्पितॄन्कृष्णैर्तर्पयेत्यमृतेनयः॥यश्चरा
जाद्विजातीनांतस्मैसोमात्मनेनमः॥३९॥महतस्त
मसःपारेपुरुषंज्वलनद्युतिं॥यंज्ञात्वामृत्युमत्येति
तस्मैज्ञेयात्मनेनमः॥४०॥यंबृहंतंबृहत्युक्थेयम
ग्नौयंमहाध्वरे॥यंविप्रसंघागायंतितस्मैवेदात्म
नेनमः॥४१॥ऋग्यजुसामधामानंदशार्धहविरा ६
कृतिं॥यंसप्ततंतुंतन्वंतितस्मैयज्ञात्मनेनमः॥४२॥

च चतुर्भिश्चतुर्भिश्चद्वाभ्यांपंचभिरेवच॥हूयतेचपुनर्द्वा
भ्यांतस्मैयज्ञात्मनेनमः॥४३॥यःसुपर्णोयजुर्नामछं
दोगात्रस्त्रिवृच्छिराः॥रथंतरंबृह[illegible]तस्मैस्तोत्रात्म त्साम
नेनमः॥४४॥यंसहस्रसवेसत्रेयज्ञेविश्वसृजामृ
षिः॥हिरण्यवर्णंशकुनिंतस्मैतार्क्ष्यात्मनेनमः॥प
दांगसंधिपर्वाणंस्वरव्यंजनलक्षणं॥४५॥यमाहुर
क्षरंनित्यंतस्मैवागात्मनेनमः॥४६॥यज्ञांगोयोवरा
होभूत्वागामुज्जहारह॥लोकत्रयहितार्थायतस्मैवी

र्यात्मने नमः ॥४८॥ यः शेते योगमास्थाय पर्यंके नाग
भूषिते ॥ फणासहस्ररचिते तस्मै निद्रात्मने नमः ॥
यस्तनोति सतां सेतुमृतेनामृतयोनिना ॥ धर्मार्थव्य
वहारार्थं तस्मै सत्यात्मने नमः ॥४९॥ यः पृथग्धर्मच
रणाः पृथग्धर्मफलैषिणः ॥ पृथग्धर्मैः समर्च्यंति तस्मै
धर्मात्मने नमः ॥५०॥ यतः सर्वसूयंते घनंगात्मां ७
गदेहिनः ॥ उन्मादः सर्वभूतानां तस्मै कामात्मने नमः ॥

यमव्यक्तमभिव्यक्तं विचिन्वंति महर्षयः ॥ क्षेत्रे क्षे
त्रसमासीनं तस्मै क्षेत्रात्मने नमः ॥५२॥ यं त्रिधा
त्मानमात्मस्थं व्रतं षोडशभिर्गुणैः ॥ प्राहुः सप्त
दशं सांख्यास्तस्मै सांख्यात्मने नमः ॥५३॥ यं वि
निद्रा जितश्वासाः सत्वस्थाः संयतेंद्रियाः ॥ ज्योतिः
पश्यंति युंजानास्तस्मै योगात्मने नमः ॥५४॥ अ
पुंण्यपुण्योपरमे यं पुनर्भयनिर्भयाः ॥ शांताः सं
न्यासिनो यांति तस्मै मोक्षात्मने नमः ॥५५॥ यो सौ

युगसहस्रांतेप्रदिप्तार्चिर्विभावसाः॥संभक्षयति
भूतानितस्मैघोरात्मनेनमः॥संभक्ष्यसर्वभूतानि
कृत्वाचैकार्णवंजगत्॥बालस्त्वपितियश्चैकस्तस्मै
मायात्मनेनमः॥५७॥अजस्यनाभ्यांसंभूतेयस्मि
न्विश्वंप्रतिष्ठितं॥पुष्करेपुष्कराक्षस्यतस्मैप
द्मात्मनेनमः॥५८॥सहस्रशिरसेतस्मैपुरुषाया ८
मितात्मने॥चतुःसमुद्रपर्यायियोगनिद्रात्मनेनमः॥

यस्यकेशेषुजीमुतानद्यःसर्वांगसंधिषु॥कुक्षौ
समुद्राश्चत्वारस्तस्मैतोयात्मनेनमः॥६०॥य
स्मात्सर्वाप्रसूयंतिसर्गप्रलयविक्रियाः॥यस्मिं
श्चैवप्रलीयंतेतस्मैमोहात्मनेनमः॥६१॥योनि
षण्णाभवेद्रात्रौदिवाभवतिधिष्ठितः॥इष्टानि
ष्टस्यद्रष्टायतस्मैद्रष्टात्मनेनमः॥६२॥अकुंठं
सर्वकार्येषुधर्मकार्यार्थमुद्यतं॥वैकुंठस्यहित

द्रूपं तस्मै कार्यात्मने नमः ॥६३॥ त्रिःसप्तकृत्वो यः
क्षत्रं धर्मव्युत्क्रांतगौरवं ॥ क्रुद्धो निजघ्ने समरे त
स्मै ऊर्जात्मने नमः ॥६४॥ विभज्य पंचधात्मानं वा
युर्भूत्वा शरीरगः ॥ यश्चेष्टयति भूतानि तस्मै वा
य्वात्मने नमः ॥६५॥ युगेष्वावर्त्तते योसौ दिन
र्त्वयनहायनैः ॥ सर्गप्रलययोः कर्त्ता तस्मै काला ९
त्मने नमः ॥६६॥ ब्रह्मवक्त्रं भुजौ क्षत्रं कृत्स्न

मूरूदरं विशः ॥ पादौ यस्याः श्रिताः शूद्रास्तस्मै
वर्णात्मने नमः ॥६७॥ यस्याग्निरास्यं द्यौर्मूर्धा ख
न्नाभिश्चरणौ क्षितिः ॥ सूर्यश्चक्षुर्दिशः श्रोत्रे
तस्मै विश्वात्मने नमः ॥६८॥ विषये वर्त्तमानानां
पंचवैशेषिकैर्गुणैः ॥ प्राहुर्विषयगोप्तारं तस्मै गो
सात्मने नमः ॥६९॥ प्राणानां धारणार्थाय यो
न्नं भुंक्ते चतुर्विधं ॥ अंतर्भूतः पचत्याग्निस्तस्मै

पाकात्मने नमः॥७०॥ पक्षोपरः कालात्परो यज्ञात्प
रः सदसतश्च यः॥ अनादिरादि विश्वस्य तस्मै वि
श्वात्मने नमः॥७२॥ रसातलगतः श्रीमाननंतो
भोगवान्विभुः॥ जगद्धारयते कृत्स्नं तस्मै वीर्या
त्मने नमः॥७३॥ पिंगोत्स्रणायटं यस्य रूपं दंष्ट्रा
नखायुधं॥ दानवेंद्रांतकरणं तस्मै दृप्तात्मने १०
नमः॥७४॥ यो मोहो यतिभृता निस्नेहरागा

नुबंधनैः॥ सर्गस्य रक्षणार्थाय तस्मै मोहात्मने
नमः॥७५॥ आत्मज्ञानमिदं ज्ञानं ज्ञात्वा पंचस्वव
स्थितं॥ यज्ज्ञानिनोधिगच्छंति तस्मै ज्ञानात्मनेन
मः॥७६॥ अप्रमेयशरीराय सर्वतोनंतचक्षुषे॥ अ
पारपरिमेयाय तस्मै चिंत्यात्मने नमः॥७७॥ सांख्यै
र्योगैर्विनिश्चित्य साध्यैश्च परमर्षिभिः॥ अस्य नज्ञा
यते तत्वं तस्मै गुह्यात्मने नमः॥७८॥ जटिने दंडिने

नित्यंलंबोदरशरीरिणे॥कमंडलुनिषंगायतस्मै
ब्रह्मात्मनेनमः॥७९॥शूलिनेत्रिदशेशायत्र्यंबका
यमहात्मने॥भस्मदिग्धोर्द्ध्वलिंगायतस्मैरुद्रात्म
नेनमः॥८०॥कृतभस्मांगरागायव्यालयज्ञोपवी
तिने॥पिनाकशूलहस्तायतस्मैरुद्रात्मनेनमः॥
सर्वभूतात्मभूतायभूतायनिधनायच॥अक्रोध
द्रोहमोहायतस्मैशांतात्मनेनमः॥८२॥यस्मिन्
सर्वयतःसर्वयःसर्वसर्वतश्चयः॥यश्चसर्वमयोदे ॥७३॥

वस्तस्मैसर्वात्मनेनमः॥८३॥विश्वकर्मन्नमस्तेस्तु
विश्वात्मन्विश्वसंभवः॥अपवर्गोसिभूतानांपंचा
नांपुरतस्थितः॥८४॥नमस्तेत्रिषुलोकेषुनमस्ते
परतस्त्रिषु॥नमस्तेदिक्षुसर्वासुत्वंहिसर्वपरायणं॥८५॥
नमस्तुभगवन्विष्णोलोकानांप्रभवाप्यय॥त्वंहिकर्ता
हृषीकेशसंहर्ताचापराजितः॥८६॥द्यौस्तेशिरसा
व्याप्तापद्भ्यांदेवीवसुंधरा॥विक्रमेणत्रयोलोकाः
पुरुषोसिसनातनः॥८७॥दिशोभुजारविश्चसुवीर्ये

शुक्रप्रजापतिः॥सप्तमार्गानिरु स्तेवायोरमिततेजसः
अतसीपुष्पसंकाशंपीतवाससमच्युतं॥येनमस्यंतिगो
विंदंनतेषांविद्यतेभयं॥८९॥नमोनरकसंत्रासरक्षा
मंडलकारिणे॥संसारनिम्नगावर्तनवकाष्टायविष्णवे॥९०॥
नमोब्रह्मण्यदेवायगोब्राह्मणहितायच॥जगद्धिताय
कृष्णायगोविंदायनमोनमः॥९१॥प्राणकांतारपाथे
यंसंसारव्याधिभेषजं॥दुःखशोकपरित्राणंहरिरित्य १२
क्षरद्वयं॥९२॥यथाविष्णुमयंतत्त्वंयथाविष्णुमयंजगत्